एकादशः पाठः

११

# उद्यानविहारः

(पाठेऽस्मिन् उद्याने विद्यार्थि-आचार्ययोः मध्ये फलानि, वृक्षान् चाधारीकृत्य वार्तालापः अस्ति। अनेन पाठमाध्यमेन फलानां, वृक्षाणां च नाम्ना ज्ञानं प्राप्स्यन्ति। विद्यार्थिनः प्रकृतिं प्रति प्रेमभावः जागृतः भविष्यति।)

**आचार्यः** – छात्राः ! अद्य वयं भ्रमणार्थम् उद्यानं गमिष्यामः। तत्र बहून् वृक्षान् द्रक्ष्यामः।

**सुरेशः** – आचार्यवर ! नगरात् बहिः एकं विशालम् उद्यानम् अस्ति। तदेव वयं द्रष्टुं इच्छामः।

**( उद्यानं गत्वा )**



**आचार्यः** – मालाकार ! शोभनं खलु तव उद्यानम् , अत्र बहवः जनाः प्रतिदिनं विहाराय उद्यानम् आगच्छन्ति। वयं त्वया किञ्चिद् ज्ञातुम् इच्छामः।

**मालाकारः** – पृच्छन्तु भवन्तः यथेच्छम्। अहं यावद् जानामि तावद् वक्ष्यामि।

**मुकेशः** – भद्र ! कति वृक्षाः सन्ति तव उद्याने ?

**मालाकारः** – न जानामि निश्चितसङ्ख्यां तु, परं शताधिकाः वृक्षाः सन्ति।

**राधा** – भद्र ! युष्माकम् उद्याने केषां फलानां वृक्षाः सन्ति ?

**मालाकारः** – अत्र आम्राणां, दाडिमानां, नारङ्गाणां, जम्बीराणां, बदराणां, च वृक्षाः सन्ति।

**राकेशः** – किं युष्माकम् उद्याने आरुकाणि, पालवेतफलानि, अलीचीकाः, वातादानि, अमृतफलानि च न सन्ति ?

**मालाकारः** – एतानि फलानि शीतप्रदेशेषु एव भवन्ति। मम उद्यानं तु उष्णप्रदेशेषु स्थितम् अस्ति।

**सलमा** – किं अत्र निम्बवृक्षाः न सन्ति।

**मालाकारः** – भवन्तः तत्र पश्यन्तु। तत्र निम्बवृक्षाः, शिंशपाः, शुभाञ्जनाः, कोविदाराः, अन्ये चापि वृक्षाः सन्ति। ते छायां यच्छन्ति।

**आचार्यः** – भद्र! तव उद्याने अधुना कानि फलानि पक्वानि सन्ति।

**मालाकारः** – अधुना तु आम्राणि एव पक्वानि सन्ति।

**आचार्यः** – तर्हि आनय अस्मभ्यम्। वयं सर्वे तव कूपजलेन तानि प्रक्षाल्य खादिष्यामः मूल्यं च दास्यामः।

**मालाकारः** – श्रीमन्तः! प्रकोष्ठात् आनयामि।(गत्वा एकस्मिन् करण्डे आम्राणि आनयति) इमानि आम्रफलानि।

**छात्राः** – अहो! मनोहराणि इमानि फलानि।

**आचार्यः** – कियत् एतेषां मूल्यम्।

**मालाकारः** – केवलं अशीतिः रूप्यकाणि।

(आचार्यः मालाकाराय अशीतिः रुप्यकाणि यच्छति तदन्तरं सर्वे छात्राः कूपं प्रति गच्छन्ति। तत्र सर्वे छात्राः आचार्याः च जलेन आम्राणि प्रक्षाल्य खादन्ति प्रसीदन्ति च।)

**आचार्यः** – भो बालकाः! शृण्वन्तु सर्वैः आम्रवृक्षस्य त्वग्बीजानि अवकरपात्रे एव पातनीयानि न इतस्ततः।

**सलमा** – अत्यन्तं मधुराणि आम्राणि एतानि। मम मनः भृशं मोदते एककिलोपरिमितस्य कियत् मूल्यम् ?

**मालाकारः** – चत्वारिंशता रूप्यकैः एककिलोपरिमितम्।

**सलमा** – तर्हि अर्धकिलोपरिमितं ददातु।

**आचार्यः** – मन्ये युष्माभिः सह मया अपि इदानीम् उद्यानस्य आनन्दः सम्यक् अनुभूतः। उद्याने शोभमानाः एते वृक्षाः यथा मधुराणि फलानि प्रादुर्भावयन्ति तथैव जीवनोपयोगिकाष्ठं ततः अधिकं च स्वच्छं वातावरणं सृजन्ति, यत् खलु अस्माकं जीवनाय नितराम् आवश्यकम् अस्ति। अतः अस्माभिः सर्वैः उद्यानानां संरक्षणाय संवर्धनाय च बद्धपरिकरैः भाव्यम्।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| द्रष्टुम् | दर्शनार्थम् | देखने के लिए |
| गत्वा | गमनं कृत्वा | जाकर |
| ज्ञातुम् | ज्ञानार्थम् | जानने के लिए |
| आम्राणाम् | आम्रफलानाम् | आमों के |
| दाडिमानाम् | दाडिमफलविशेषाणाम् | अनार के |
| नारङ्गाणाम् | नारङ्फलविशेषाणाम् | संतरों के |
| भद्रः | सज्जनः | महाशय |
| पक्वानि | रसपरिपूर्णानि | पके हुए |
| पालवेतफलानि | सेवफलानि | सेब |
| अस्मभ्यम् | अस्माकम् कृते | हमारे लिए |
| प्रक्षाल्य | क्षालनं कृत्वा | धोकर |
| प्रकोष्ठात् | भण्डारगृहात् | भण्डार गृह से |
| करण्डे | फलपात्रे | टोकरे में |
| प्रादुर्भावयन्ति | उत्पादयन्ति | उत्पन्न करते हैं। |
| सृजन्ति | निर्मान्ति | बनाते है। |
| नितराम् | पूर्णरुपेण | बिल्कुल |
| बद्धपरिकरैः | दृढनिश्चयैः | दृढ निश्चय किये हुए |

## अभ्यासः

१. **निम्नलिखितशब्दानाम् उच्चारणं कुरुत –**

द्रक्ष्यामः, इच्छामः, द्रष्टुम्, पृच्छतु

यथेच्छम्, वक्ष्यामि, दास्यामि, किञ्चित्

**२. एकपदेन उत्तराणि लिखत –**

(क) उद्यानं कीदृशम् अस्ति ?

(ख) उद्याने कति वृक्षाः सन्ति ?

(ग) विहाराय जनाः कुत्र आगच्छन्ति ?

(घ) स्वच्छं वातावरणं के सृजन्ति ?

(ङ) सलमा कियत् किलोपरिमितानि आम्रफलानि क्रीणाति।

**३. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत –**

(क) वयं तव उद्यानम् आगच्छामः।

(ख) जनाः प्रतिदिनं विहाराय उद्यानम् आगच्छन्ति।

(ग) वयं सर्वे तव कूपजलेन फलानि प्रक्षालयामः।

(घ) एकस्मिन् च करण्डे आम्राणि आनयति।

**४. मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत –**

| त्वया, उद्याने , फलानि, पक्वानि, एतानि |
|---|

(क) उद्याने अधुना.............. फलानि सन्ति।

(ख) वयं............................. किञ्चित ज्ञातुम् इच्छामः।

(ग) ................. फलानि शीतलप्रदेशेषु एव भवन्ति।

(घ) छात्राः आचार्यः च ................... खादन्ति।

(ङ) कति वृक्षाः सन्ति तव................. ।

**५. अधोलिखितानां पदानां लिङ्गं, विभक्तिं, वचनं च लिखत –**

| | | | |
|---|---|---|---|
| **यथा – जनाः** | **पुँल्लिङ्गम्** | **प्रथमा विभक्तिः** | **बहुवचनम्** |
| (क) नगरात् | .................. | .................. | ................ |
| (ख) युवकेभ्यः | ................. | .................. | ................ |
| (ग) उद्याने | ................. | .................. | .................. |
| (घ) आचार्याः | ................. | .................. | .................. |
| (ङ) पक्वानि | .................. | .................. | .................. |
| (च) जीवनाय | .................. | .................. | ................. |

६. **असङ्गतं पदं चिनुत -**

(क) वक्ष्यामि, दास्यामि, पास्यामि, आम्राणि। ........................

(ख) आम्राणां, मनुष्याणां, दाडिमानां, बदराणां। ........................

(ग) इमानि, एतानि, कानि, सेवानि। ........................

(घ) मालाकारः, आचार्यः, रमेशः, बहवः। ........................

७. **मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत -**

| |
|---|
| **हरितः, नीलः, कृष्णः, पीतः** |






(क) शुकस्य वर्णः ....................अस्ति।

(ख) युतकस्य वर्णः....................अस्ति।

(ग) आकाशस्य वर्णः ................अस्ति।

(घ) कोकिलस्य वर्णः................अस्ति।

## योग्यता-विस्तारः

**मञ्जूषातः उचितपदं चित्वा वाक्यानि पूरयत -**

| |
|---|
| पुष्पाणि, उद्यानम्, कन्दुकेन, भ्रमणम्, दोलायाम्, सरोवरः, कमलानि, बालकाः |



इदम् एकम् ...................................... अस्ति।

अत्र विविधानि ........................... विकसितानि सन्ति। उपवने एका बालिका ......................... उपविष्टा दृश्यते। बालकाः........................... क्रीडन्ति। जनाः प्रातः काले .............................. कुर्वन्ति। उद्याने एकः जलपूर्णः........................... अपि अस्ति। तस्मिन् अनेकानि................... .................. विकसन्ति। सरोवरस्य तटे .................................. क्रीडन्ति।